Answer Script Submission Email Id:
scm.sans.ss@gmail.com

लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2021-22

## SANADSE03T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

1. सरलसुरगिरा देवनागरीलिप्या च यथेच्छं द्वयस्य उत्तरं लेख्यम्। 10×2 = 20

(क) 'वाक्यं रसात्मकं काव्यमि'ति विश्वनाथकृतं काव्यलक्षणं प्रतिपदव्यावृत्तिपुरःसरम् आलोच्यताम्।

(ख) 'कीटानुविद्धरत्नादिसाधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः'॥ इति प्रकरणमुल्लिख्य सविस्तारं व्याख्यायताम् अयं श्लोकः।

(ग) रसस्य स्वप्रकाशकत्वं व्याख्याय विशदतया तस्यालौकिकत्वं प्रतिष्ठाप्यताम्।

(घ) विश्वनाथमते लक्षणाभेदाः उदाहरणपुरःसरम् आलोच्यन्ताम्।

2. अधोलिखितेषु यथेच्छम् श्लोकचतुष्टयस्य सरलसुरगिरा व्याख्या कार्य्या। 5×4 = 20

(क) विलोकनेनैव तवामुना मुने कृतःकृतार्थोऽस्मि निबर्हितांहसा।
तथापि शुश्रूषुरहं गरीयसी-र्गिरोऽथवा श्रेयसि केन तृप्यते॥

(ख) चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः॥

(ग) स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः।
विदिद्युते बाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां निधिः॥

(घ) विधाय तस्यापचितिं प्रसेदुषः प्रकाममप्रीयत यज्वनां प्रियः।
ग्रहीतुमार्यान्परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः॥

(ङ) गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।
पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः॥

(च) तमर्घ्यमर्घ्यादिकयाऽऽदिपुरुषः सपर्यया साधु स पर्यपूपुजत्।
गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः॥

अथवा

अधोलिखितेषु यथेच्छं विषयचतुष्टयम् अवलम्ब्य टीका लेख्या। 5×4 = 20

शिशुपालवधस्य उत्सः, शिशुपालः, माघः, नारदस्य वपुः, अच्युतः, अनुरुसारथिः।

3. अधोलिखितेषु यथेच्छम् पञ्चानाम् प्रश्नानाम् उत्तरं लेख्यम्। 2×5 = 10

(क) युगजीवनमिति रूपकस्य रचयित्री का ? कश्च रूपकस्यास्य प्रकाशकालः ?

(ख) अस्मिन् रूपके कस्य माहात्म्यं प्रतिभासितम् ? रूपके कस्य आस्तिकदर्शनस्य तत्त्वं प्रतिपादितम् ?

(ग) रूपकस्यास्य अध्यायविभाजनं लेख्यम्।

(घ) 'मुद्रा मृत्तिका, मृत्तिका मुद्रा ' इत्युक्तिः कस्य ? प्रसङ्गश्च कः ?

(ङ) मथुरानाथः कः ?

(च) सारदादेव्याः पितरौ कौ आस्ताम् ?

(छ) भवतारिण्याः मन्दिरं कुत्र विराजते ? अस्य मन्दिरस्य प्रतिष्ठा केन कृता ?

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——